यस्क। लभ्य[1]। [2]दुह्य। अयःस्थूण। [3]तृणकर्ण। एते पञ्च शिवादिषु पठ्यन्ते। ततः परेभ्यः [4]षड्भ्यः इञ्। सदामत्त। [5]कम्बलभार। [6]बहिर्योग। [7]कर्णाटक। पिण्डीजङ्घ। [8]बकसक्थ। ततः परेभ्यश्चतुर्भ्यः 'गृष्टयादिभ्यश्च' (४.१.१३६/११४३) इति [9]ढञ्। [10]बस्ति। [11]कुद्रि। [12]अजबस्ति। [13]मित्रयु। ततः परेभ्यो द्वादशभ्य इञ्। [14]रक्षोमुख। जङ्घारथ। [15]उत्कास। [16]कटुकमन्थक। पुष्करसत्। [17]विषपुट। [18]उपरिमेखल। क्रोष्टुमान। [19]क्रोष्टुपाद। क्रोष्टुमाय। [20]शीर्षमाय। [21]पुष्करसच्छब्दाद् बाह्वादिपाठाद् इञ्। खरपशब्दो नडादिषु पठ्यते, ततः फक्। [22]पदक। [23]वर्मक। एताभ्याम् 'अत इञ्' (४.१.९५/१०९५)। भलन्दनशब्दात् 'शिवादिभ्योऽण्' (४.१.११२/१११५)। भडिल। भण्डिल। भडित। भण्डित। एतेभ्यश्चतुर्भ्यः 'अश्वादिभ्यः फञ्' (४.१.११०/१११३) ॥

## यञञोश्च। (६४/११०८)

बहुषु तेनैवास्त्रियाम् (२.४.६२/११९३), गोत्रे (२.४.६३/११४६) इति [24]चानुवर्तते। यञोऽञश्च गोत्रप्रत्ययस्य बहुषु वर्तमानस्य [25]अस्त्रीलिङ्गस्य लुग् भवति। 'गर्गादिभ्यो यञ्' (४.१.१०५/११०७)—गर्गाः। वत्साः। अञः खल्वपि, 'अनृष्यानन्तर्ये बिदादिभ्योऽञ् (४.१.१०४/११०६) — बिदाः। उर्वाः। बहुष्वित्येव, गार्ग्यः। बैदः। [26]तेनैव इत्येव, प्रियगार्ग्याः। प्रियबैदाः। अस्त्रियाम् इत्येव, गार्ग्यः स्त्रियः। बैद्यः स्त्रियः। गोत्रे इत्येव, 'द्वीपादनुसमुद्रं यञ्' (४.३.१०/१३८०) — द्वैप्याः। उत्सादिभ्योऽञ् (४.१.८६/१०७८) — [27]औत्साश्छात्राः।

[१७५] यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसङ्ख्यानम्। (म.भा. १.४९३)

गार्ग्यस्य कुलम् गार्ग्यकुलं गर्गकुलं वा। गार्ग्ययोः कुलं गार्ग्यकुलं गर्गकुलं वा। एवं बैदस्य कुलं बैदकुलं बिदकुलं वा। बैदयोः कुलं बैदकुलं बिदकुलं वा। यञादीनाम् इति किम्? आङ्गकुलम्। [28]एकद्वयोः इति किम्? गर्गाणां कुलं [29]गर्गकुलम्। तत्पुरुषे इति किम्? गार्गस्य समीपमुपगार्ग्यम्। षष्ठ्या इति किम्? परमगार्ग्यः (म.भा. १.४९३) ॥

## अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च। (६५/११४७)

अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु[30] लुग् भवति। अत्रिशब्दात् 'इतश्चानिञः' (४.१.१२२/११२५) इति ढक्। इतरेभ्यः ऋष्यण् (४.१.११४/१११७)। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः। बहुषु इत्येव, आत्रेयः। [31]भार्गवः। तेनैव इत्येव, [32]प्रियात्रेयाः। [33]प्रियभार्गवाः। अस्त्रियाम् इति किम्? आत्रेय्यः स्त्रियः॥

---

1. लह्य ब.क.ड.इ 2. वृह्य ह. 3. पर्णति त्रिकर्ण ड. 4. सप्तभ्यः ह. 5. कम्बलहार ड. 6. अर्हयोग ड, नास्ति फ. 7. पर्णाटक, कर्णदण्ड ड, वर्णाटक ह. 8. बकसंस्थ. 9. ढक् ब.ह. 10. बिस्ति क.इ, बिद्रिसत् ह. 11. कर्द्रु ड. 12. रजवस्ति ह, नास्ति फ. 13. मित्रयः इ. 14. रक्षेरक फ. 15. उत्सकाकुटक ड. 16. कटुकमाथक इ. 17. विशेषपुट फ. 18. परिमेषल ब. 19. कोष्टुवाद क.फ. 20. शीर्षस्मय इ. 21. °शब्दस्य ह. 22. परक फ. 23. वर्षक ड. ह. 24. सर्वमनुवर्तते क, वर्तते इ.ह. 25. अस्त्रीलिङ्गस्य नास्ति इ. 26. तेनैव .... प्रियबैदाः नास्ति इ. 27. उत्साः इ. 28. एकस्य द्वयोः ब.फ, एकद्वन्द्वयोः ह. 29. गर्गकुलम् नास्ति फ. 30. वर्तमानस्य इत्यधिकम् क.ड.इ.ह. 31. गौतमः क नास्ति ह. 32. नास्ति क. 33. नास्ति क.फ.